শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ শ্রীমদ্ভগৱদ্গীতা ॥

## ॥ পুরুষোত্তমযোগঃ ॥

(পঞ্চদসোধ্যাযঃ)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥ পুৰুষোত্তমযোগঃ ॥
## (পঞ্চদসোধ্যাযঃ)

*শ্ৰীভগৱানুৱাচ*

ঊৰ্ধ্ৱমূলমধঃশাখমশ্ৱত্থং প্ৰাহুৰৱ্যযম্।
ছন্দাংসি যস্য পৰ্ণানি যস্তং ৱেদ স ৱেদৱিত্॥ ১৫-১ ॥

অধশ্চোৰ্ধ্ৱং প্ৰসৃতাস্তস্য শাখা
গুণপ্ৰৱৃদ্ধা ৱিষযপ্ৰৱালাঃ।
অধশ্চ মূলান্যনুসন্ততানি
কৰ্মানুবন্ধীনি মনুষ্যলোকে॥ ১৫-২ ॥

ন ৰূপমস্যেহ তথোপলভ্যতে
নান্তো ন চাদিৰ্ন চ সংপ্ৰতিষ্ঠা।
অশ্ৱত্থমেনং সুৱিৰূঢমূলং
অসঙ্গশস্ত্ৰেণ দৃঢেন ছিত্ত্ৱা॥ ১৫-৩ ॥

ততঃ পদং ততপৰিমাৰ্গিতৱ্যং
যস্মিনগতা ন নিৱৰ্তন্তি ভূযঃ।
তমেৱ চাদ্যং পুৰুষং প্ৰপদ্যে
যতঃ প্ৰৱৃত্তিঃ প্ৰসৃতা পুৰাণী॥ ১৫-৪ ॥

নিৰ্মানমোহা জিতসঙ্গদোষা
অধ্যাত্মনিত্যা ৱিনিৱৃত্তকামাঃ।
দ্বন্দ্বৈৰ্ৱিমুক্তাঃ সুখদুঃখসঞ্জৈঃ
গচ্ছন্ত্যমূঢাঃ পদমৱ্যযং তত্॥ ১৫-৫ ॥

ন তদ্ভাসযতে সূৰ্যো ন শশাঙ্কো ন পাৱকঃ।
যদ্গত্বা ন নিৱৰ্তন্তে তদ্ধাম পৰমং মম॥ ১৫-৬ ॥

মমৈৱাংশো জীৱলোকে জীৱভূতঃ সনাতনঃ।
মনঃষষ্ঠানীন্দ্ৰিযাণি প্ৰকৃতিস্থানি কৰ্ষতি॥ ১৫-৭ ॥

শরীরং যদৱাপ্নোতি যচ্চাপ্যুত্ক্রামতীশ্বরঃ।
গৃহীত্বৈতানি সংযাতি ৱায়ুর্গন্ধানিৱাশযাত্॥ ১৫-৮ ॥

শ্রোত্রং চক্ষুঃ স্পর্শনং চ রসনং ঘ্রাণমেৱ চ।
অধিষ্ঠায মনশ্চাযং ৱিষযানুপসেৱতে॥ ১৫-৯ ॥

উত্ক্রামন্তং স্থিতং ৱাপি ভুঞ্জানং ৱা গুণান্বিতম্।
ৱিমূঢা নানুপশ্যন্তি পশ্যন্তি জ্ঞানচক্ষুষঃ॥ ১৫-১০ ॥

যতন্তো যোগিনশ্চৈনং পশ্যন্ত্যাত্মন্যৱস্থিতম্।
যতন্তোপ্যকৃতাত্মানো নৈনং পশ্যন্ত্যচেতসঃ॥ ১৫-১১ ॥

যদাদিত্যগতং তেজো জগদ্ভাসযতেখিলম্।
যচ্চন্দ্রমসি যচ্চাগ্নৌ তত্তেজো ৱিদ্ধি মামকম্॥ ১৫-১২ ॥

গামাৱিশ্য চ ভূতানি ধারযাম্যহমোজসা।
পুষ্ণামি চৌষধীঃ সর্ৱাঃ সোমো ভূত্বা রসাত্মকঃ॥ ১৫-১৩ ॥

অহং ৱৈশ্বানরো ভূত্বা প্রাণিনাং দেহমাশ্রিতঃ।
প্রাণাপানসমাযুক্তঃ পচাম্যন্নং চতুর্ৱিধম্॥ ১৫-১৪ ॥

সর্ৱস্য চাহং হৃদি সন্নিৱিষ্টো
মত্তঃ স্মৃতির্জ্ঞানমপোহনঞ্চ।
ৱেদৈশ্চ সর্ৱৈরহমেৱ ৱেদ্যো
ৱেদান্তকৃদ্ৱেদৱিদেৱ চাহম্॥ ১৫-১৫ ॥

দ্ৱাৱিমৌ পুরুষৌ লোকে ক্ষরশ্চাক্ষর এৱ চ।
ক্ষরঃ সর্ৱাণি ভূতানি কূটস্থোক্ষর উচ্যতে॥ ১৫-১৬ ॥

উত্তমঃ পুরুষস্ত্ৱন্যঃ পরমাত্মেত্যুধাহৃতঃ।
যো লোকত্রযমাৱিশ্য বিভর্ত্যৱ্যয ঈশ্বরঃ॥ ১৫-১৭ ॥

যস্মাত্ক্ষরমতীতোহমক্ষরাদপি চোত্তমঃ।
অতোস্মি লোকে ৱেদে চ প্রথিতঃ পুরুষোত্তমঃ॥ ১৫-১৮ ॥

যো মামেৱমসংমূঢো জানাতিপুরুষোত্তমম্।
স সর্ৱৱিদ্ভজতি মাং সর্ৱভাৱেন ভারত॥ ১৫-১৯ ॥

ইতি গুহ্যতমং শাস্ত্ৰমিদমুক্তং মযানঘ।
এতত্বুদ্ধ্বা বুদ্ধিমান্স্যাতকৃতকৃত্যশ্চ ভাৰত॥ ১৫-২০ ॥

॥ ইতি শ্ৰীমদ্ভগৱদ্গীতাসূপনিষতসু ব্ৰহ্মৱিদ্যাযাং যোগশাস্ত্ৰে
শ্ৰীকৃষ্ণাৰ্জুনসংৱাদে পুৰুষোত্তমযোগো নাম পঞ্চদসোধ্যাযঃধ্যাযঃ ॥